# Suryamandalastotram or Suryamandalashtakam

# સૂર્યમણ્ડલસ્તોત્રં અથવા સૂર્યમણ્ડલાષ્ટકમ્

## Document Information

Text title : Suryamandalastotram or Suryamandalashtakam or Suryamandaladvadasha stotram

File name : sUrya8.itx

Category : navagraha, aShTaka, dvAdasha

Location : doc_z_misc_navagraha

Transliterated by : Girish Beehary, Karthik Raman

Proofread by : Girish Beehary, Karthik Raman

Description-comments : The stotra was conveyed by Lord Krishna to Arjuna

Latest update : April 12, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2020

*sanskritdocuments.org*

Suryamandalastotram or Suryamandalashtakam

# સૂર્યમણ્ડલસ્તોત્રં અથવા સૂર્યમણ્ડલાષ્ટકમ્

નમઃ સવિત્રે જગદેકચક્ષુષે જગત્પ્રસૂતી સ્થિતિનાશહેતવે ।
ત્રયીમયાય ત્રિગુણાત્મધારિણે વિરઞ્ચિ નારાયણ શઙ્કરાત્મન્ ।
નમોઽસ્તુ સૂર્યાય સહસ્રરશ્મયે સહસ્રશાખાન્વિતસમ્ભવાત્મને ।
સહસ્રયોગોદ્ભવભાવભાગિને સહસ્રસઙ્ખ્યાયુગધારિણે નમઃ ॥
યન્મણ્ડલં દીપ્તિકરં વિશાલં રત્નપ્રભં તીવ્રમનાદિરૂપમ્ ।
દારિદ્ર્યદુઃખક્ષયકારણં ચ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧॥

યન્મણ્ડલં દેવગણૈઃ સુપૂજિતં વિપ્રૈઃ સ્તુતં ભાવનમુક્તિકોવિદમ્ ।
તં દેવદેવં પ્રણમામિ સૂર્યં પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૨॥

યન્મણ્ડલં જ્ઞાનઘનં ત્વગમ્યં ત્રૈલોક્યપૂજ્યં ત્રિગુણાત્મરૂપમ્ ।
સમસ્ત-તેજોમય-દિવ્યરૂપં પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૩॥

યન્મણ્ડલં ગૂઢમતિપ્રબોધં ધર્મસ્ય વૃદ્ધિં કુરુતે જનાનામ્ ।
યત્સર્વપાપક્ષયકારણં ચ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૪॥

યન્મણ્ડલં વ્યાધિવિનાશદક્ષં યદૃગ્યજુઃસામસુ સમ્પ્રગીતમ્ ।
પ્રકાશિતં યેન ચ ભૂર્ભુવઃ સ્વઃ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૫॥

યન્મણ્ડલં વેદવિદો વદન્તિ ગાયન્તિ યચ્ચારણ-સિદ્ધસઙ્ઘાઃ ।
યદ્યોગિનો યોગજુષાં ચ સઙ્ઘાઃ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૬॥

યન્મણ્ડલં સર્વજનૈશ્ચ પૂજિતં જ્યોતિશ્ચ કુર્યાદિહ મર્ત્યલોકે ।
યત્કાલકાલાદ્યમનાદિરૂપં પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૭॥

યન્મણ્ડલં વિષ્ણુચાતુર્મુખાખ્યં યદક્ષરં પાપહરં જનાનામ્ ।
યત્કાલકલ્પક્ષયકારણં ચ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૮॥

યન્મણ્ડલં વિશ્વસૃજં પ્રસિદ્ધમુત્પત્તિ-રક્ષા-પ્રલય-પ્રગલ્ભમ્ ।
યસ્મિઞ્જગત્સંહરતેઽખિલં ચ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૯॥

યન્મણ્ડલં સર્વગતસ્ય વિષ્ણોરાત્મા પરં ધામ વિશુદ્ધતત્ત્વમ્ ।
સૂક્ષ્માન્તરૈર્યોગપથાનુગમ્યં પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૦॥

યન્મણ્ડલં વેદવિદો વદન્તિ ગાયન્તિ યચ્ચારણ-સિદ્ધસઙ્ઘાઃ ।
યન્મણ્ડલં વેદવિદઃ સ્મરન્તિ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૧॥

યન્મણ્ડલં વેદવિદોપગીતં યદ્યોગિનાં યોગપથાનુગમ્યમ્ ।
તત્સર્વવેદ્યં પ્રણમામિ સૂર્યં પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૨॥

સૂર્યમણ્ડલસુસ્તોત્રં યઃ પઠેત્ સતતં નરઃ ।
સર્વપાપવિશુદ્ધાત્મા સૂર્યલોકે મહીયતે ॥ ૧૩॥

ઇતિ શ્રી ભવિષ્યોત્તરપુરાણે શ્રીકૃષ્ણાર્જુનસંવાદે
સૂર્યમણ્ડલસ્તોત્રં સમ્પૂર્ણમ્ ॥

સૂર્યમણ્ડલદ્વાદશસ્તોત્રમ્

Encoded and proofread by Girish Beeharry

*Suryamandalastotram or Suryamandalashtakam*
pdf was typeset on August 9, 2020

Please send corrections to *sanskrit@cheerful.com*